International Journal of Sanskrit Research 2024; 10(3): 01-04

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 01-04
© 2024 IJSR
www.anantaajournal.com
Received: 02-02-2024
Accepted: 07-03-2024

**डॉ. प्रदीप्तकुमारनन्दः**
श्री जगन्नाथ संस्कृत विश्वविद्यालयः, श्रीविहारः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**डॉ. प्रदीप्तकुमारनन्दः**
श्री जगन्नाथ संस्कृत विश्वविद्यालयः, श्रीविहारः, पुरी, ओडिशा, भारत

# इस्लामदर्शनसमीक्षणम्

**डॉ. प्रदीप्तकुमारनन्दः**

**सारांश**
इस्लामधर्मः (अरबीभाषायां: الإسلام; अल-इस्लाम) अपोस्टोलिकपरम्परातः उत्पन्नः अब्राहमीयः, एकेश्वरवादी सम्प्रदायः अस्ति । अस्य उत्पत्तिः ७ शताब्द्यां अरबप्रायद्वीपे अभवत् । इस्लामिकपरम्परानुसारं अल्लाहस्य अन्तिमः पैगम्बरः मुहम्मदः मनुष्याणां समक्षं प्रकटितस्य पुस्तकस्य कुरानस्य शिक्षायाः आधारेण निर्मितम् अस्ति, तत्र हदीसः, सीरात-अन-नबी, शरीयतग्रन्थाः च समाविष्टाः सन्ति इस्लामधर्मे सुन्नी, शिया, सूफी, अहमदीय समुदायाः प्रमुखाः सन्ति । इस्लामधर्मस्य धार्मिकस्थानानि मस्जिदः इति उच्यन्ते । अनुयायिनां कुलजनसंख्यानुसारं इस्लामधर्मः विश्वस्य द्वितीयः बृहत्तमः धर्मः अस्ति । अद्यत्वे विश्वे प्रायः १.९ अर्ब (अथवा १९० कोटितः २०० कोटि) मुसलमानाः सन्ति । तेषु प्रायः ८५% सुन्नी, प्रायः १५% शिया च । अधिकांशः मुसलमानाः दक्षिणपूर्व एशिया, दक्षिण एशिया च देशेषु निवसन्ति । मध्यपूर्वे, आफ्रिकादेशे, यूरोपे च मुसलमानानां बहवः समुदायाः निवसन्ति । विश्वे प्रायः ५६ देशाः सन्ति यत्र मुसलमानानां बहुमतम् अस्ति । विश्वे एतादृशाः बहवः देशाः सन्ति । यत्र मुस्लिमजनसंख्यायाः विषये विश्वसनीयसूचना उपलब्धा नास्ति । इस्लामदर्शनस्य सारोऽत्र प्रदर्श्यते ।

**कूटशब्दः** इस्लाम, नमाज, कोरान, मुहम्बद

## प्रस्तावना

### देवदूताः (फरिश्ते)

मुसलमानाः स्वर्गदूतानां (अरबीभाषायां "मलाईका"/उर्दूभाषायां "फरिश्ते") अस्तित्वं मन्यन्ते । तेषां मते स्वर्गदूतानां स्वयमेव किमपि अन्तःकरणं नास्ति, ते च ईश्वरस्य आज्ञां सम्यक् अनुसरन्ति । ते केवलं प्रकाशनिर्मिताः अमूर्ताः निर्दोषाः च आकृतयः सन्ति, ये न पुरुषाः न च महिलाः, परन्तु सर्वथा मनुष्येभ्यः भिन्नाः सन्ति । यद्यपि स्वर्गदूताः असंख्याः तथापि कुरान-ग्रन्थे केषाञ्चन स्वर्गदूतानां नामानि सन्ति । ते च-

1. जिब्राईल अलैहिसल्लामः यः भविष्यद्वादिभ्यः दूतेभ्यः (रसुलेभ्यः नबीभ्यश्च) परमेश्वरस्य सन्देशं ददति ।
2. इजरायल अलैहिस्सलमः मृत्युदूतः अस्ति यः ईश्वरस्य आज्ञानुसारं मानवात्मानं गृह्णाति।
3. मीकाइल अलैहिस्सलमः यः ईश्वरस्य आज्ञानुसारं ऋतुपरिवर्तनं करोति ।

4. इस्राफील अलैहिस्सलम यः प्रलयारम्भे ईश्वरस्य आज्ञानुसारं उच्चैर्वदति ।
5. किरामन कातिबीन यः मनुष्याणां कर्मफलं लिखति ।

मुनकिर नकीरैन् यः मनुष्यस्य मृत्योः पश्चादागत्य तं त्रीणि प्रश्नानि पृच्छति।[1]

**संप्रदायप्रवर्तकः**

मुहम्मद् इब्न अबदुल्लाह अल हाशिमः अस्य दर्शनस्य आधारपुरुषः । असौ धर्मसंस्कारकस्तथा प्रचारकरूपेण स्वीकृतः । तत्प्रोक्तं इस्लाममतं मुख्यतयाऽद्वैतवादोपरि सन्निवेशितम् । अत्र द्वैतवादसम्बधीया मूर्त्तिपूजा सर्वादौ विवर्जिता । अल्ला निर्गुणः । स एव परमेश्वर अद्वितीयः। अल्लायां पूर्णभावेन समर्पणो हि इस्लामशब्दस्यार्थः । अधुना मक्का नगरी साउदी आरव नाम्ना परिचिता। पुरा मक्कायां कुरैश जातयः निवसन्ति स्म ।[2] ते मूर्तिपूजका आसन्। मक्कास्थित कावामन्दिरं तेषामुपासनास्थलमासीत् । ३६० देवादेव्यस्तथा सर्वमुख्यः "हज्र असवद्" तत्र पूजिता आसन् । हजरत मुहम्मदः सहस्रवर्षात् पूर्वं कावामन्दिरमासीदिति ऐतिहासिका मीमांसन्ते । कावा संप्रति "मस्जिद् हेजाज" वा प्रार्थनागृहरूपेण तिष्ठति । अस्य पूर्वस्यां दिशि "संगे असवद"(हज्र असवद्) विराजते। कृष्णप्रस्तरखण्डमिदं रौप्येण परिमण्डितं सुसज्जितं च दृश्यते। इस्लामधर्मावलम्बिनः तीर्थङ्करा (हज) यात्रावसरे कावापीठं सप्तप्रदक्षिणीकृत्य तं चुम्बन्ति । अत्र "आब ए जमजम" नामकं कूपं वर्तते । श्रूयते आदिपैगम्बर-इब्राहिम्नः सुपुत्र-इस्माइल अस्य कर्तास्ति । तस्य पदाघातेन कूपोत्पत्तिः बभूव । अस्य जलं परमं पवित्रं तथा सर्वतीर्थजलसदृशमिति मुहम्मदीयाः मन्यन्ते। आदिपैगम्बर इब्राहिमद्वारा कावा प्रतिष्ठिता, पश्चात् मुहम्मदेन पुनर्निर्मिता ।

तदा कुरैशजातीनाम् अधिपतिः हाशिमः महम्मदः पितामहः आसीत् । पश्चात्तभ्राता मुत्तलिवः अधिपतिः बभूव। पुनः हाशिमपुत्रः अबदुल मुत्तलिव उपरि भारो न्यस्तः । अबदुल्ला हाशिमस्य कनिष्ठपुत्र आसीत्। अबदुल्ला नामस्य पितुरयं महात्मा २०-०४-५७० ख्रीष्टाब्दे[3] सोमवासरे प्रातः सूर्योदयवेलायां महापुरुषमुहम्मद अरब-देशस्थित-मक्का नामकस्थाने पुत्रत्वेन आत्मानं प्रकटयामास । ८/६/६३२ ई.पूर्वे पञ्चत्वमवाप ।[4] तदानीन्तनकाले मक्काक्षेत्रं पूर्णतया सौन्दर्यपूर्णमासीत्। पर्वतमालाभिः सुसज्जितमिदं क्षेत्रं प्राकृतिकं मनोमुग्धकरं च ।

मुहम्मदो जन्मनः षण्मासात्पूर्वं हि अस्य पितृ-अबदुल्लायाः वियोगो जातः। विधवायाः मातुः आमनायाः गर्भादस्य धरावतरणं संजातम् । आमना अत्यन्तं दुर्बला रुग्णा च आसीत् । स्वपुत्रमुहम्मदः लालन-पालने तस्याः असमर्थतां दृष्ट्वा कनिष्ठपितृ-अब्बु लहवेन "हलीमा" नाम्नी परिचारिकायै सः प्रदत्तः । हलीमा महम्मदः पुत्रवत् पालयामास । कालान्तरे पञ्चवर्षेषु गतवत्सु मुहम्मदः स्वमातरं प्रत्यागतः । तस्मिन् तिष्ठति वर्षद्वयं पश्चात् आमिना पञ्चत्वमवाप । पश्चात् ज्येष्ठपितृव्येन मुहम्मद् आबु तालिवेनादिष्टः सन् दशवर्षाणि यावत् मुहम्मद् मकायाः पार्वत्याञ्चले छागचारणकार्ये नियुक्तः । आबाल्यात् सः धीरगम्भीर एकान्तप्रियश्च आसीत् । ततः प्रथमतः आबु तालिवेन सह शामदेशं प्रति वाणिज्यार्थं जगाम । पश्चात्सः व्यापारे पारंगतो बभूव। तदानीं मकायाः प्रसिद्धव्यापारी दिवं गतः । तस्य पन्ती "खदीजा" एका बुद्धिमती महिला आसीत्। मुहम्मदः परिचयं प्राप्य सा मुहम्मदं व्याप्यारार्थं सिरियादेशं प्रेषितवती । कालान्तरे मुहम्मदः प्रतिभां सन्निरीक्ष्य तां विवाहकर्तुं परिचारिकाहस्तेन सा स्वेच्छां प्रकटितवती । तदानीं मुहम्मदः पञ्चविंशतिवर्षिययुवकः आसीत् । खदीजा चत्वारिंशत् वर्षिया आसीत् । उभययोः विवाहः संजातः ।[5] विधवा-खदीजायाः त्रयः सन्तानाः आसन् । उभयोः पारस्परिकप्रेम सुमधुरमासीत् ।

चत्वारिंशत् वयसि मुहम्मदि परिवर्तनं जातम् । मक्कास्थित-हिर-पर्वतकोटरे सः उपवासेन कठोरतपस्यां चकार ।[6] कोरानमतानुसारं "अलि"नाम्ना केनचित् देवदूतेन संबोधितः सः कुरानं कण्ठस्थीचकार । तत्र पूर्वसूरीणां आदम-इब्राहीम-मूसा-दाउद-ईसादीनां भविष्यद्वक्तृणां (नबी) मतवादे संस्कारमानेतुम् आल्लाद्वारा सः प्रेषितः (रसुल) इति सर्वत्र प्रचारितः । आल्लायाः सः अन्तिमः पैगम्बरः आसीत् ।

पैगम्बरः ईश्वरीयसन्देशवाहकः, भविष्यद् वक्ता । मुहम्मद्शब्दस्यार्थः प्रशंसनीयः । मुहम्मदः त्रयः पुत्रास्तथा चतस्रः कन्याः आसन् । तस्य त्रयोदशसंख्यकाः पत्न्यः आसन्। पूर्णतया निरीश्वरवादं प्रचार-प्रसारं कृत्वा सः कतिपयानां मक्कावासीनां चरमशत्रुत्वेन परिगणितः । मूर्तिपूजां विहाय सर्वेश्वर निराकार-आल्ला-पूजनं, उच्चनीचभेदभावाकरणं, सर्वेषु भ्रातृभावेन स्नेहदानं, द्युतक्रीडा-मद्यपान-चौर्य-कन्यानिर्यातनाद्यकरणीयानि कर्माणि त्यक्तव्यानीति मुहम्मदः प्रमुखमतानि संगृहीतानि । मुहम्मदः आकस्मिकपरिवर्तनेन मक्कावासिनः अबदुल्लापुत्रः पागलोऽभूदिति प्रचारो विहितः । तं वारम्बारं गालिमकुर्वन्। तमुपरि मलमूत्रादिकमपि त्यक्तवन्तः ।

[1] कुरआन -82-9 व 10

[2] इस्लाम धर्मका उद्भव और विकास, पृ २७

[3] २२/०४/५७१,पैगम्बर इस्लाम,पृ-७

[4] इस्लाम आरब राष्ट्रियता का साधन, पृ-७

[5] पैगम्बर इस्लाम हजरत मुहम्बद का जीवन,पृ१०

[6] तत्र,पृ१५

सर्वशेषे यदा तं मारयितुं प्रयासः कृतस्तदा सः चतुश्चत्वारिंशद् वयसि ६१४ ख्रीष्टाब्दे कतिपयैः स्व-अनुयायिभिः सह रात्रौ सपरिवारं मक्कां विहाय मदीनां प्रति पलायितः। मक्कातो मदीना ४५० कि.मि दूरे अवस्थिता। तत्र "मस्जिद् ए नब्बबी" तथा महापुरुष मुहम्मदः समाधिपीठं वर्तते। पैगम्बरः अष्टादशवर्षाणि तत्र मदीनायां स्थित्वा ८-६-६३२ ख्रीष्टाब्दे ज्वररोगेण दिवं गतः।

**संप्रदायभेदः**

उत्तराधिकारप्रसंगं नीत्वामुहम्मदः पश्चात् इस्लामधर्मः शिया सुन्नी भेदेन द्विधा विभक्तः। हजरत अलि मुहम्मदो जामाता आसीत्। शियासंप्रदायाः तं नेता (खलिफा) मन्यन्ते। अबू बक्करः मुहम्मदः श्वशुरः एव। सुन्नीसंप्रदायाः तं नेतृरूपेण(इमाम) स्थिरीकृताः, इत्यनयोः विवादः संघटितः। किन्तु तात्त्विकदृष्ट्या द्वयोर्मध्ये कोपि मतान्तरो नास्ति। कालान्तरे द्वयोरपि नानासंप्रदायाः सृष्टाः। शियासंप्रदायः इन्सा- अशरी-जैदिया-इस्माइल शिया-दाउदी बोहरा-खोजा-नुसैरी भेदेन षोढा विभक्ताः। सुन्नी संप्रदायोपि अबू हनीफा-मालिक-शाफइ-हंबल-सलफी भेदेन पञ्चधा विभक्ताः। एषु इमाम अबू हनीफा संप्रदायोपि देवबन्दी-बरेली भेदेन द्विधा विभक्तः। अखिले विश्वे सुन्नीसंप्रदायाः ९० प्रतिशतांकाः शियाश्च १० प्रतिशतांकाः सन्ति।

**धर्मग्रन्थः**

इस्लामसिद्धान्तः वस्तुतः कोरानमुपरि पर्यवसितः। कोरान, कुरान, कुरआन इति इस्लामधर्मग्रन्थस्य नामभेदः ख्यातः। अल्लायाः सन्देशवाहकः (फरिस्ता) जिब्राइल(अलि) इमामीश्वरीयवाणीं मुहम्मदं श्रावयामास। हजरत आदमः अस्य प्रथमप्रवर्तकत्वेन निर्दिष्टः। इस्लाम,यहुदी, ईसाईमान्यतायामसौ आदिपैगम्बतरूपेण स्वीकृतो बभूव। कोरानस्य भाषा आरबी। अस्मिन् ११४ अध्यायाः (सूरा) सन्ति। ६२३६ संख्यकाः श्लोकाः (आयत) सन्ति। मुहम्मदो मृत्युः पश्चात् ६३२ ख्रीष्टाब्दे अबू बक्करः कोरानं ग्रन्थरूपं प्रदातुं चिन्तितवान्। पश्चात् "जैद इब्न थाबिनः" ६५५ ख्रीष्टाब्दे कोरानमेकत्रीकृतः।

"हदीसः" मुहम्मदः शिक्षासंग्रहः। "अहादीसः" सर्वासां शिक्षानामेकत्रीकरणात्मको ग्रन्थविशेषः, य उभय शिया-सुन्नीसंप्रदायानां कृते परमादरणीयः सम्माननीयश्च वर्तते।

"नमाजः" पारसिकशब्दः पाठात्मकः प्रार्थना विशेषः। सादरं ईश्वरं प्रति निवेदनं मस्तकावनतं नमाजः। अरबभाषया "सलाह" इति ख्यातः। "कुरान शरीफे" अस्य सलाहशब्दस्य बहुलः प्रयोगः कृतः। इस्लामधर्मावलम्बिनां कृते दिवसस्य पञ्चकृत्व नमाजः पठनीयः। समयानुसारमस्य पञ्च-नाम-भेदो जातः। १-नमाज ए फज्रः सूर्योदयात्प्राक् उषाकाले २-नमाज ए जुहरः मध्याह्नसमये ३-नमाज ए अस्रः सूर्यास्तात्प्राक् ४-नमाज ए मगरिकः सूर्यास्तपश्चात् ५-नमाज ए ईशा सूर्यास्तस्य १/३० सार्धाधिकैकहोरायाः पश्चात्।[7] पाठ-नियमस्तु

हस्तौ पादौ सम्यक् प्रक्षाल्य नासिकयोः श्लेष्मां निष्कार्ष्य शरीरं विधौत्य शिरसि च आर्द्रहस्तं भ्रामयित्वा संपूर्णशुद्धः सन् नमाजस्य पाठः करणीयः। नमाजस्य प्राक् सर्वेभ्यः सम्यक्सूचनादानं तु उद्घोषणम् "अजान" नाम्ना परिचितम्।[8] तत्र सुन्नत-जमाअत भेदेन द्विप्रकारको नमाजपाठो विधीयते। एकाकी पाठः सुन्नतः, समूहपाठो जमाअतः। संप्रति इस्लामसारः प्रस्तूयते सम्यक्। यदुक्तं कुरान शरिफे-

न आल्ला कदापि त्वां परित्यक्तः, तुभ्यं क्रोधितः नापि त्वयि जुगुपसितो वा। तव भविष्यं अतीतात् बहु सुन्दरम्। तुभ्यं सः इयत् दास्यति येन त्वं तृप्तो भविष्यसि। मनुष्यस्य सकृदेव पुनर्जन्म भवति। ईश्वरवचनानुसरणेन (कुरानपाठेन नमाजपाठेन च) पुण्यकर्मणा स्वर्गप्राप्तिः पापेन च नर्कप्राप्तिर्जायते।

**जन्नत (स्वर्गः)**

इस्लामधर्मातिरिक्तं अन्येषु धर्मेषु यथा स्वर्गस्य महत्त्वं अस्ति तथैव इस्लाममते अल्लाह-विश्वासिनां कृते अल्लाहः स्वाशीर्वादेन तेभ्यः परलोकेऽद्भुतस्थानं प्रयच्छति यत् जन्नत (स्वर्गः) इति उच्यते। तेषां मतानुसारं ये प्रत्यहं नमाजं पठन्ति, दानं कुर्वन्ति, सद्कर्म कुर्वन्ति, कुरानं पठन्ति, ईश्वरेषु स्वर्गदूतेषु धर्मपुस्तकेषु च विश्वासं कुर्वन्ति, केवलं ते एव स्वर्गं गन्तुं शक्नुवन्ति। स्वर्गः सुखमयो विलासस्थानम्। यः स्वर्गं लौकिकवस्तूनाम् प्राप्तिस्थानं मन्यते, सः पवित्रकुरानस्य एकं अक्षरमपि न जानाति।

**जहन्नम (नर्कः)**

इस्लामविरोधिनः स्वर्गविपरीतं नर्कस्थानं गच्छन्ति यत्र मनुष्याणां कृते दुःखददण्डः विद्यते। अत्र दुष्टाः दण्डात्मकदुःखं प्राप्नुवन्ति। इस्लामधर्मानुसारं अल्लाह/ईश्वरः तान् जनान् नरकं प्रेषयिष्यति ये जगति तस्य आदेशान् न अनुसरन्ति। नर्कः पश्चात्तापः कष्टप्रदश्च।

**अल्लाह (ईश्वरः)**

अल्ला सर्वेश्वरः। निर्गुणोपि साकारः। घटपटादिकं तस्य साकारस्वरूपत्वात्। एकं द्वे त्रीणि चत्वारि - - -एवं क्रमेण सप्ताकाशानि। तस्मिन् स निवसति। आल्लायाः बहुगुणाः

[7] https://naat.operaking.in/namaz-ka-tarika-in-hindi-nama-pana-ka-taraka

[8] https://www.herzindagi.com/hindi/society-culture/how-many-rakat-of-five-time-namaz-article-270623

तैर्निश्चिताः । तन्नये सः सर्वेषां पालकः (रब), अशेषदयामयः(रहमान), सदाकरुणामयः(रहिम), सर्वेषां प्रभुः(मालिके यो मिद्दिन) इति नाना (दुआ) संज्ञाभिरीश्वरप्रशंसा तैर्विहिता। अल्लाह खुदा। परमेश्वरः । तस्य वयं सन्तानाः । हे मालिक!(अल्लाह) वयं त्वां पूजयामः। अस्मान् तन्मार्गं प्रदर्शय, येन मार्गेण वयं सर्वे उपकृताः । यत्र तव क्रोधो नास्ति, न कोपि पथभ्रष्टो जातः । इति अल्लां प्रति प्रार्थनापरकं निवेदनं इस्लामधर्मस्य गौरवं गायति । अल्लोपनिषदि अपि तत्र तत्र मुहम्मदस्य इस्लामस्य च उल्लेखः अस्ति । तथाहि-

अमालं इष्टार्विनिविनिधाते । इल्लल्ले वरुनो राजा पुनर्दधु । हया मित्रो इल्लन इल्लल्ले इल्लन वरुनो मित्रस्तागेस्काम। होतारमिन्द्रो होतारमिन्द्र महासुरिन्द्र। अल्लो ज्येष्ठं श्रेष्ठं परं पूर्णं ब्रह्मणम् अल्लम्। अल्लोरसूलमहामदारकबरस्य अल्लो अल्लाम ।[9] अर्थात् "असौ अल्लाहः ब्रह्म । स एकमेवाद्वितीयमस्ति । मित्रवरुणेन्द्रादयः तस्य गुणभूता सन्ति। स सर्वसृष्टेः राजा अस्ति यो मित्रवत् सर्वेषां जनानां कार्यं व्यवस्थापयति । सः उदारः, सर्वाधिकशक्तिशाली च अस्ति ।

अग्रेर्देवः मृत्तिकायाश्च मनुष्यः उद्भवः । देवेषु केचन मार्गभ्रष्टाः आलायाः शत्रुरूपेण निश्चिताः । ते मनुष्यान् भ्रमे पातयन्ति । वस्तुतस्ते राक्षसाः (शैतान) एव । तेषां दमनमत्यावश्यकम् ।

सत्यकथनं, चौर्यमकरणं, मद्यपानमकरणं, दयाप्रकाशनं च सद्गुणा भवन्ति । नमाजपठनं, उपवास(रोजा) करणं, दान (जकात)प्रदानम्, एवं जीवनावधि सकृत्कावा (तीर्थं मक्का ) दर्शनं च चत्वारो नियमाः इस्लामे बलवत्तराः ।

**सहायकग्रन्थाः**


1. नमाज हिन्दी
2. कुरान शरीफ हिन्दी
3. इस्लामी सिद्धान्तोंका दर्शन
4. Understanding muhamad and muslim
5. हजरत मुहम्मद और इसलाम
6. दर्शन दिग्दर्शन हिन्दी
7. इसलाम धर्म हिन्दी
8. ईस्लाम उद्भव और विकास
9. इस्लाम का जन्म तथा प्रसार
10. इस्लाम धर्म की दर्शन भूमि
11. इस्लाम धर्म समीक्षा

1. कुरान भाष्य
2. कुरान आदर्श
3. कुरान सार
4. हजरत मुहम्बद और इस्लाम
5. हजरत मुहम्बद और भारतीय धर्म
6. पैगम्बर इस्लाम
7. https://naat.operaking.in/namaz-ka-tarika-in-hindi-nama-pana-ka-taraka
8. https://www.herzindagi.com/hindi/society-culture/how-many-rakat-of-five-time-namaz-article-270623


[9] अल्लोपनिषत्,१-३